मिति। बड़वा+अण्। बड़वासम्बन्धिनि, त्रि। यथा, सुश्रुते। १। ४५।

"दीपनीयमचक्षुष्यं वाड़वं दधि वातलम्॥")

वा(वा)ड़वः, पुं, (वाड़ं यज्ञान्तस्नानं वाति प्राप्नोतीति। वाड़+वा+कः।) ब्राह्मणः। (बड़वायां घोटक्यां जातः। बड़वा+अण्।) बड़वानलः। इत्यमरः॥ तत्पर्य्यायः। और्व्वः २ संवर्त्तकः ३ अब्धाग्निः ४ बड़वामुखः ५। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ६६। ६४।

"महोदधेर्जठरगतश्च वाड़वो
भवान् विभूत्या परया करे स्थितः॥")

वा(वा)ड़वाग्निः, पुं, (बड़वा समुद्रस्था घोटकी तत्सम्बन्ध्यग्निः।) बड़वानलः। इति जटाधरः॥ (यथा, माघे। ११। ४५।

"पयसि सलिलराशेर्नक्तमन्तर्निमग्नः
स्फुटमनिशमतापि ज्वालया वाड़वाग्नेः॥")

वा(वा)ड़वाग्र्यः, पुं, (वाड़वेषु ब्राह्मणेषु अग्र्यः श्रेष्ठः।) ब्राह्मणश्रेष्ठः। यथा,—

"इत्याकर्ण्य वचस्तस्य वाड़वाग्र्यस्य धीमतः।
पप्रच्छ हृष्टमानस्कस्तीर्थयात्राविधिं मुनिम्॥"
इति पाद्मे पातालखण्डे १६ अध्यायः॥

वा(वा)ड़वेयौ, पुं, (बड़वाया घोटकरूपधारिण्याः सूर्य्यपत्न्या अपत्ये पुमांसौ। बड़वा+ढक्।) अश्विनीकुमारौ। इति शब्दमाला॥

वा(वा)ड़व्यं, क्ली, (वाड़वानां ब्राह्मणानां समूहः। वाड़व+"ब्राह्मणमाणववाड़वाद् यत्।" ४।२।४२। इति यत्।) ब्राह्मणसमूहः। इत्यमरः॥

वाड़िङ्गनः, पुं, (वाड् प्लावनं तस्मै इङ्गते इति। वाड्+इङ्ग+ल्यु।) वार्त्ताकुः। इति रत्नमाला॥

वाढ़ं, क्ली, (वाह प्रयत्ने+क्तः। "क्षुब्धस्वान्तध्वान्तेति।" ७।२।१८। इति निपातनात् साधुः।) अतिशयः। (यथा, कथासरित्सागरे। २४। ६८।

"वाढ़ं मया सा नगरी दृष्टा विद्यार्थिना सता॥")

प्रतिज्ञा। इत्यमरः। ३। ३। ४४॥ वाढ़मित्यव्ययमपीति वृद्धाः। इति भरतः॥

"वाढ़ं चिन्तु दृढ़े क्लीवमनुमत्यामथ त्रिषु॥"
इति नानार्थरत्नमाला॥

(सत्यम्। यथा, रघुः। १६। ५२।

"वाढ़मेषु दिवसेषु पार्थिवः
कर्म्म साधयति पुत्त्रजन्मने॥")

वा(वा)णः, पुं, (वणनं वाणः शब्दस्तदस्यास्तीति। वाण+अच्।) अस्त्रविशेषः। तिर इति भाषा। तत्पर्य्यायः। पृषत्कः २ विशिखः ३ अजिह्मगः ४ खगः ५ आशुगः ६ कलम्बः ७ मार्गणः ८ शरः ९ पत्री १० रोपः ११ इषुः १२। इत्यमरः। २। ८। ८६॥ चित्रपुङ्खः १३ शायकः १४ वीरतरः १५ तूणक्ष्वेड़ः १६ काण्डः १७ विपर्णकः १८ शरुः १९ वाजी २० पत्रवाहः २१ अस्त्रकण्टकः २२॥ लौहमयवाणस्य पर्य्यायः। प्रक्ष्वेड़नः १ लोहनालः २ नाराचः ३॥ क्षिप्तवाणस्य पर्य्यायः। प्रहितः १ निरस्तः २॥ विषाक्तवाणस्य पर्य्यायः। तीक्ष्णः १ लिप्तकः २ दिग्धः ३॥ तीरो निष्फलसायके। इति शब्दरत्नावली॥ * ॥ (यथा, ऋग्वेदे। ६। ७५। १७।

"यत्र वाणाः संपतन्ति कुमारा विशिखा इव।
तत्रा नो ब्रह्मणस्पतिरदितिः शर्म्म यच्छतु
विश्वहा शर्म्म यच्छतु॥")

वलिराजस्य ज्येष्ठपुत्त्रः। यथा,—

"वलेः पुत्त्रशतं त्वासीद्वाणज्येष्ठन्ततो द्विजाः।
वाणः सहस्रबाहुः स्यात् सर्व्वास्त्रगुणसंयुतः॥
तपसा तोषितो यस्य पुरे वसति शूलधृक्।
महाकालत्वमगमत् साम्यं यस्य पिनाकिनः॥"
इति मत्स्यपुराणे ५ अध्यायः॥

(अस्य जन्मादिविवरणन्तु वाणयुद्धशब्दे द्रष्टव्यम्। विस्तृतिस्तु हरिवंशे विष्णुपर्व्वणि १७३ अध्यायमारभ्य द्रष्टव्या॥) गोस्तनः। केवलः। इति मेदिनी। णे, २७॥ अग्निः। इति त्रिकाण्डशेषः॥ काण्डावयवः। इति विश्वः॥ भद्रमुञ्जः। इति राजनिर्घण्टः॥ (पुं, स्त्री, नीलझिण्टी। इति वैजयन्ती॥ यथा, माघे। ६। ४६।

"विकचवाणदलावलयोऽधिकं
रुरुचिरे रुचिरेक्षणविभ्रमाः॥"

वण्यते शब्द्यते इति। वण शब्दे+"अकर्त्तरि च कारके संज्ञायाम्।" ३। ३। १९। इति घञ्। वाक्। इति निघण्टुः॥ इक्ष्वाकुवंशीयोऽयोध्याराजः स्वनामख्यातो विकुक्षेः पुत्त्रः। यथा, रामायणे। १। ७०। २२—२३।

"इक्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्येव विश्रुतः।
कुक्षेरथात्मजः श्रीमान् विकुक्षिरुदपद्यत॥
विकुक्षेस्तु महातेजा वाणः पुत्त्रः प्रतापवान्।
वाणस्य तु महातेजा अनरण्यः प्रतापवान्॥"

कादम्बरीप्रणेता कविविशेषः। यथा, कादम्बर्य्यां कविवंशवर्णने।

"सरस्वतीपाणिसरोजसम्पुट-
प्रसुप्तहोमश्रमसीकराम्भसः।
यशोंऽशुशुक्लीकृतसप्तविष्टपात्
ततः सुतो वाण इति व्यजायत॥
द्विजेन तेनाक्षतकण्ठकौण्ठ्यया
महामनोमोहमलीमसान्धया।
अलब्धवैदग्ध्यविलासमुग्धया
धिया निबद्धेयमतिद्वयी कथा॥"

अयमेव हर्षचरितप्रणेता इति केचित्॥)

वा(वा)णगङ्गा, स्त्री, (वाणेन प्रकटिता गङ्गा नदीविशेषः।) रावणवाणनिर्भिन्नसोमेश्वरगिरिभवनदीविशेषः। यथा,—

"सोमेशाद्दक्षिणे भागे वाणेनाद्रिं विभिद्य वै।
रावणेन प्रकटिता जलधारातिपुण्यदा।
वाणगङ्गेति विख्याता या स्नानादघहारिणी॥
स्नात्वा तु वाणगङ्गायां दृष्ट्वा वाणेश्वरं विभुम्।
गङ्गास्नानफलं प्राप्य मोदते देववद्दिवि॥"

इति वाराहे सोमेश्वरादिलिङ्गमहिमावमुक्तिक्षेत्रमहिमा त्रिवेण्यादिमहिमा नामाध्यायः॥

वा(वा)णदण्डः, पुं, (वाणस्य दण्डः।) वायदण्डः। तत्पर्य्यायः। वेमा २। इति हेमचन्द्रः॥

वा(वा)णपुष्पा, स्त्री, (वाणस्य+पुष्पा।) शरपुष्पा। इति राजनिर्घण्टः॥

वा(वा)णपुरं, क्ली, (वाणस्य राज्ञः पुरं नगरम्।) वाणराजनगरम्। तत्पर्य्यायः। देवीकोटः २ कोटीवर्षम् ३ ऊषावनम् ४ शोणितपुरम् ५। इति त्रिकाण्डशेषः॥ आग्नेयम् ६ उमावनम् ७ कोट्टवीपुरम् ८। इति शब्दरत्नावली॥

वा(वा)णभट्टः, पुं, ग्रन्थकारविशेषः। (स तु कादम्बर्य्यादिग्रन्थप्रणेता।) "ननु मङ्गलं कथं क्रियते मङ्गलाद्विघ्नध्वंसः विघ्नध्वंसात् प्रारिप्सितसिद्धिरिति चेन्न। वाणभट्टादेर्मङ्गले सत्यपि ग्रन्थसमाप्त्यभावात् माघादौ मङ्गलाभावेऽपि समाप्तिदर्शनात्।" इति मुग्धबोधटीकायां दुर्गादासः।

वा(वा)णयुद्धं, क्ली, (वाणेन सह युद्धम्।) वाणराजेन सह श्रीकृष्णस्य संग्रामः। तस्य विवरणम्। यथा,—

श्रीशुक उवाच।

"वाणः पुत्त्रशतज्येष्ठो वलेरासीन्महात्मनः।
सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्मृड़म्॥
भगवान् सर्व्वभूतेशः शरण्यो भक्तवत्सलः।
वरेण च्छन्दयामास स तं वव्रे पुराधिपम्॥
स एकदाह गिरिशं पार्श्वस्थं वीर्य्यदुर्म्मदः।
किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम्॥
नमस्ये त्वां महादेव! लोकानां गुरुमीश्वरम्।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम्॥
दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत्।
त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम्॥
कण्ड्वा निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम्।
आद्यायां चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुवुः॥
तत् श्रुत्वा भगवान् क्रुद्धः केतुस्ते भज्यते यदा।
त्वद्दर्पघ्नं भवेन्मूढ़! संयुगं मत्समेन ते॥
इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप!।
प्रतीक्षन् गिरिशादेशं स्ववीर्य्यनशनं कुधीः॥
तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम्।
कन्यालभत कान्तेन प्रागदृष्टश्रुतेन सा॥
सा तत्र तमपश्यन्ती क्वासि कान्तेतिवादिनी।
सखीनां मध्य उत्तस्थौ विह्वला व्रीड़िता भृशम्॥
वाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता।
सख्यपृच्छत् सखीमुषां कौतूहलसमन्विता॥
कं त्वं मृगयसे! सुभ्रु! कीदृशस्ते मनोरथः।
हस्तग्राहं न तेऽद्यापि राजपुत्त्र्युपलक्षये॥
ऊषोवाच।
दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः।
पीतवासा वृहद्बाहुर्योषितां हृदयङ्गमः॥
तमहं मृगये कान्तं पाययित्वाधरं मधु।
क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे॥